ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
PP. No.- 184-186
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- III, Issues-29, YEAR- July-Sept.-2023

# संस्कृतसाहित्ये पर्यावरणं तत्संरक्षणेऽध्यात्मविद्याया योगदानम्

डॉ0 जनार्दन झा
सहायक प्रोफेसर– संस्कृत, राजकीय महिला महाविद्यालय, सलेमपुर, देवरिया (उ0प्र0), भारत

Received-15.09.2023, Revised-22.09.2023, Accepted-28.09.2023 E-mail: drjanardanjha@gmail.com

***सारांशः*** *अध्ययनमिदमुच्चशिक्षाक्षेत्रे अपेक्षितप्रयासं रेखांकरोति। शोधपत्रमिदं पूर्वाध्ययनविषयात् पृथगस्ति। इदं शोधपत्रं समाजाय महत्वपूर्णमपि विद्यते। शोधपत्रमिदं पुस्तकालयीयविश्लेषणात्म–कं विधावाधारितमस्ति। शोशपत्रेऽस्मिनन्वेषणपूर्णा–नुस–न्धान वर्णनात्मकानुसन्धान–योः प्रयोगः विहितो विद्यते। अस्मिन् शोधपत्रे प्रायो हि परिकल्पनापेक्षया तस्य सम्यक् निर्माणे ध्यानं दत्तमस्ति। एतदध्यनेन विवरणं गुणात्मकं परिदृश्यते। अध्ययनमिदं गवेषकाणां कृते सर्वतोभावेन मार्गदर्शको भविष्यतीति मे विश्वासः।*

***कुंजीभूत शब्द– परिधौ, विधीयते, निबध्नता, यशसे, अलौकिकस्य, उपलभ्यते, महर्षिवाल्मीकेः,रामायणकाव्यं, निदर्शनमस्ति,निरामयं।***

प्राथम्येन इद ज्ञातव्यं यत् किं नाम पर्यावरणमिति। 'यत् परितः समावृणोति तदेव पर्यावरणम्। समासेन समुच्यते चेत् पृथ्वी–वायु–जल–आकाश–तेजाख्यानि पञ्चभूतान्येव पर्यावरणाधारत्त्वानि वर्तन्ते। सर्वेषामेतेषां शुद्धिरेव तत्संरक्षणमस्ति। भारतीयसंसकृतेः गौरवाधायकतत्त्वेषु संस्कृतसाहित्यस्य महत्त्वपूर्णं स्थानमस्ति। वेदपुराणशास्त्रोक्तज्ञानेन सार्धं लौकिकज्ञानविज्ञाने पुरस्कृत्य प्रवृत्तस्य संस्कृतसाहित्यस्य परिधौ स नास्तिक कोऽपि विषयो यः आवेष्टितो न भवति। साहित्यशब्दः यद्यपि व्यापकार्थः, इह तु साहित्यपदेन काव्यं गृहीत्वा सघ्स्.तसाहित्ये पर्यावरणसमीक्षणं क्रियते।

**पर्यावरणसम्बद्धानि काव्यप्रयोजनानि निबध्नताचार्यमम्मटेनोक्तं**
**काव्यं यशसेऽर्थ.ते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।[1]**

इतः प्रागाचार्यभरतेन दुःखार्तानां श्रमार्तानां जनानां मनोरञ्जनं मुख्यनाट्यप्रयोजनरूपेणांगी.तमासीत्। एतानि सर्वाणि काव्यप्रयोजनानि साक्षात् सामान्यजनोपयोगीनि सन्त्यतः संस्कृतसाहित्ये लोकव्यवहारस्य लोकसौन्दर्यस्य पर्यावरणस्य च स्वाभाविकं चित्रं समुपलभ्यते। अलौकिकस्य ब्रह्मानन्दसहोदरस्य रसस्यास्वादयितारः अल्पज्ञाः सुकुमारमतयोऽपि भवन्तु कान्तासम्मितोपदेशञ्च गृह्णन्त्विति लक्ष्यमुद्दिश्य प्रवृत्तेऽस्मिन् संस्कृतसाहित्ये लोकभावनापर्यावरणे पुरस्कृत्यैव गुणालंकारोपस्कृतं सरसं भूमिकावस्तु

विधीयते। ऐतिहासिकानि लौकिकानि पौराणिकानि चाख्यानानि अवलम्ब्य विरचितेषु संस्कृतशास्त्रेषु यथास्थानं समसामयिकलोकचित्रणं परितरुपलभ्यते।

साहित्यस्य भवतीदमपि प्रधानं प्रयोजनं यन्न मात्रं मनुष्याणां मिथः व्यवहारः समर्यादः सरसश्च स्यादपि तु नदीपर्वतवनादीन्, पृथिव्यादिपंचभूतान् मानवेतरपशुपक्षिप्राणीः प्रत्यपि मानवाः उदारभावनया तत्संरक्षणभावनया च स्वकर्तव्यं निर्धारयेयुः, सर्वैः साकं तथा व्यवहरेयुः, येन प्राणिमात्रस्य जीवनमानन्दमयं संपूरितं भवेत्, संपूर्णा प्रकृतिः सुरक्षिता सन्तुलिता च परिशुद्धं विशुद्धं वा पर्यावरणं परिकल्पयेत्। आदिकवेर्महर्षिवाल्मीकेः रामायणकाव्यं लोकभावनायारुत्कृष्टं निदर्शनं विद्यते। तत्र वर्णितानि सर्वाण्यपि पात्राणि लोके यथोचितमुदात्तं चरित्रं प्रख्यापयामासुः।

आदिकवेर्महर्षिवाल्मीकेः रामायणकाव्यं लोकभावनायारुत्कृष्टं निदर्शनं विद्यते। तत्र वर्णितानि सर्वाण्यपि पात्राणि लोके यथोचितमुदात्तं चरित्रं प्रख्यापयामासुः। पर्यावरणसंरक्षणप्रतिरूपो पुरुषोत्तमावतारभूतोऽपि आदर्शप्रजापालकः श्रीरामः पितरौ, गुरून्, पत्नीं, प्रजाः भ्रातृन्, सेवकान्, सखीन् प्रति च सर्वथा लोकमर्यादानुमोदितं कर्तव्यं निर्वहति। गुरुसेवापरायणः शिष्यः, आज्ञापालकः पुत्रः, भार्याभिमतो भर्ता, स्वार्थविरहितो भ्राता, वचनपालकः सखा, श्रीरामः सर्वत्र लोकसमक्षं निजाचरणेनैव भारतीयमार्यचरित्रं प्रदर्शयति।

प्रकृतिं प्रति प्रेमभावना तद्रक्षणसन्देशश्च संस्कृतसाहित्ये पदे पदे समुपलभ्यते। कवयः भूमिं मातृभावनयोपासन्ते। अस्यां विस्तृतानां पर्वतसमुद्रतडागनदीवनादीनां सौन्दर्यं लोकोपकारित्वञ्च कविभिः विस्तरेण वर्णितम्। कालिदासभारविभ्यां वर्णितः हिमालयः, माघेन वर्णितः रैवतकः, बाणेन विस्तरेण विख्याता विन्ध्याटवी प्रत्यक्षमिव नयनपथमागच्छति। लतापादपादयो न केवलमिमां धरामलङ्कुर्वन्ति, अपि तु अत्रत्यसर्वेषां प्राणिनां सर्वविधोपकारं सम्पादयन्ति। एतेषां महत्त्वमवगच्छद्भिः संस्कृतविद्भिः तरूणां पुष्पफलपल्लवसौन्दर्यवर्णनपुर–स्सरं सर्वत्र पादपसंरक्षणसंदेशोऽपि समादिष्टः।

शरभङ्गमुनौ मुक्तिपदं गते तदाश्रमस्थपादपेषु पुत्रकर्तव्यमारोपयता महाकविकालिदासेन तरूणां मनुष्योपकारिता निर्दिर्शिता। तद्यथा–

**छायाविनीध्ताध्वपरिश्रमेषु**
**भूयिष्ठसंभाव्यफलेष्वमीषु।**
**तस्यातिथीनामधुना सपर्या**
**स्थिता सुपुत्रेष्विव पादपेषु।।[2]**

रघुवंशे महाकविकालिदासेन देवदारुं प्रति पार्वत्याः पुत्रवत् प्रीतिः वर्ण्यते। तद्यथा–

**अमुं पुरः पश्यसि देवदारुं**
**पुत्री.तोऽसौ वृषध्वजेन।**
**यो हेमकुम्भस्तननिः सृतानां**
**स्कन्दस्य मातुः पयसां रसज्ञः।।**

अनुरूपी लेखक/संयुक्त लेखक

रघुःकौत्समाश्रमकुशलजिज्ञासाप्र–सङ्गे पादपानामनामयं जिज्ञासते–

**आधारबंधप्रमुखैः प्रयत्नैः**
**संवर्धितानां सुतनिर्विशेषम्।**
**कच्चिन्न शाखादिरुपप्लवो वः**
**श्रमच्छिदामाश्रमपादपानाम्।।**[४]

अभिज्ञानाशाकुंतले शकुंतलां प्रति प्रियंवदयोक्तेन वचनेन तस्याः तरून् प्रति परमस्नेहः व्यज्यते। यथा– 'हला शकुंतले, त्वत्तोऽपि तातकण्वस्य आश्रमवृक्षाः प्रियतरा इति तर्कयामि, येन नवमालिकाकुसुमपेलवापि त्वमेतेषामालबालपूरणे नियुक्ता।' शकुन्तलापि 'न केवलं तातस्य नियोगः, ममाप्येतेषु सहोदरस्नेहः इत्युक्त्वा स्वां पादपप्रियतां व्यनक्ति।

द्योतयति शाल्मलिः वृक्षाणामशेषजीवोपकारकरणक्षम–तां कादम्बर्यां विस्तरेण वर्णितः बाणभट्टेन। उपस्थापितानि लोकभावनायाः समुत्कृष्टतमान्युदाहरणानि अन्यैः प्रायः सर्वैः महाकविभिः वृक्षलतोद्यानवनवर्णनैः प्रकृतिं प्रति स्वं प्रेम प्रदर्श्य। मानवैः दयाभावनया लोकवासिनः सर्वे जीवाः रक्षणीयतामायान्ति। न केवलं मानवानां मनोरंजनाय प्रभवन्ति पशुपक्षिणां निसर्गरमणीयाः ललितकेलयः, अपि तु जीवाः प्रत्युपकारमपि व्याहरन्ति मानवैरुप.ताः संरक्षिताश्च। सन्निदृष्टे तिष्ठन्ति सर्वतोऽप्यधिकं मनुष्याणां गावः। संस्.तसाहित्ये विस्तरेण गवां वर्णनं विहितम् प्रेमवृत्तिं गव्योपह्वतिं चामिलक्ष्य कविभिः। दिलीपकृतगोसेवा गवां महत्त्वमुपपादयन्ती भारतीयसमाजे रघुवंशस्य द्वितीयसर्गे कालिदासवर्णिता गोपालनपद्धतिस्वरूपमुद्घाटय–ति। विस्तरेणोपलभ्यते आरण्यकानामृष्याश्रमाणां वर्णनं संस्.तशास्त्रेषु। आचकर्षु तत्र पुत्रवत्संरक्षिताः पालिताश्च वन्याः पशुपक्षिणाः विशेषेण कवीनां मनांसि। सर्वैः कविभिः तेषां निश्छलस्वभाववर्णनपुरस्सरं सरंक्षणौचित्यं प्रकल्पितं प्रायः।

कौत्समाश्रममृगविषये पृच्छति रघुः–

**क्रियानिमित्तेष्वपि वत्सलत्वा–**
**दमग्नकामा मुनिभिः कुशेषु।**
**तदंकशय्याच्युतनाभिनाला**
**काच्चिन्मृगीणामनघा प्रसूतिः।।**[५]

पुत्रवत्पालितो मृगशावकः शकुन्तलाया मार्गमवरुद्ध्य तिष्ठति शाकुन्तले पतिगेहगमनकाले। शकुन्तलया वाष्पाकुललोचनया . 'अहो को न खलु एष पदाक्रान्त इव मे पुनः पुनः सज्जते वसनान्ते'?

जिज्ञासितं तम् इत्येवं रूपेण महर्षिः कण्वः सूचयति–

**यस्य त्वया व्रणविरोपणमिंगुदीनां**
**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।**
**श्यामाकमुष्टिपरिवर्धितको जहाति।**
**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।।**[५]

दुष्यन्तं निवारयन् मृगवधोद्यतं वैखानसः कथयति शाकुन्तले–

**न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्**
**मृदुनि मृगशरीरे तूलराशाविवाग्निः।**
**क्व बत हरिणकानां जीवनं चातिलोलं**
**क्व च निशितनिपाता वज्रसाराः शरास्ते।।**[६]

कण्वशिष्यस्य खल्वेकस्य वचनमेतन्न, अपि तु जीवदया– परायणतामभिव्यनक्ति भारतीयलोकस्य।

उपन्यस्तमुदाहरणमुत्कृष्टतमम् लोकभावनाया बाणभट्टेन वर्णयता च तत्संरक्षणं मुनिकृतं हारीतं जन्मवृत्तान्तं वैशंपायनशुकस्य कादम्बर्याम्। न केवलं बाणभट्टेन स्वप्रतिभाबलात् प्रत्यक्षमिव तच्चित्रमुपस्थाप्य सहृदयमनांसि अनुरञ्जितानि, अपि तु कवेः प्रकटिता लोकावलोकनकुशलतापि। नैषधीयचरिते श्रीहर्षेण हंसस्वभाववर्णनप्रसंगे पर्यावरणं प्रति व्याख्याता शुद्धलोकभावना इत्थमेव।

मनुष्याः परस्पराश्रिताः सन्तः व्यवहारान् संपादयन्ति लोकेऽस्मिन्। समाजे परिवारे च समुचितव्यवहारिणो जनाः प्रशंसाभाजः विपरीताश्च निन्द्याः भवन्ति। लोकस्योभयविधं चरित्रमुपस्थाप्य काव्यरसिकान् मनोरञ्जनेन सहशिक्षामपि प्रयच्छन्ति कवयः। आदर्शचरित्रवन्तः वीराः काव्येषु नायकपदमावहन्ति प्रायः। नार्यः नायिकारूपेण सच्चरित्राः शीलवत्यः विनयवत्यश्च वर्ण्यन्ते।

पुनश्चात्र विचारणीयं यत् पर्यावरणसंरक्षणे अध्यात्मविद्यायाः योगदान शब्देन किं तात्पर्यम्? अध्यात्मविद्याध्ययनशीलो युवकः अभिप्रेतः इति ध्वन्यते अध्यात्मविद्यायाः योगदानशब्देनात्र। यतो हि संसकृतशास्त्राधीतिनः वर्तमानसमाजे पर्यावरणप्रभृतिविषयेषु परमोदासीनाः भवन्तीति लोकप्रवादः श्रुतिपथमायाति। अत एतेषां शास्त्रग्रन्थिभेदनलग्नानां युवकानामपि पर्यावरणादिविषयेषु ध्यानमियादिति धिया विद्वद्भिः विषयोऽयं सुनिश्चितः। वेदादारभ्य वर्तमानसमयपर्यन्तं विरचितेषु संस्कृतशास्त्रेषु यथावर्णनं पर्यावरणसंरक्षणसम्बन्धे आसाद्यते तदन्यत्र दुर्लभमेव।

**स्पष्टमुदघोषितं वैदिकऋषिभिः–** 'माताभूमिः पुत्रोऽहं पृथिव्याः',७ पुरातनैः न स्वस्यैव शान्तिं काङ्क्षिता प्रार्थिता वा ते सोद्घोषं वदन्ति– 'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि'८ ईकृशाः बहवो हि मन्त्राः संस्कृतशास्त्रेषु वर्तन्ते। मन्त्रेऽस्मिन् न केवलं देशस्यैकस्य, स्थानस्यैकस्य शान्तिः कांक्षिता, अपि तु सम्पूर्णब्रह्माडस्य शान्तिः शुद्धिश्चात्र अभिकांक्षिता। यदि एतेषां मन्त्राणां ज्ञातृणां संस्कृतयुवकानां पर्यावरणसंरक्षणे योगदानं न भविष्यति चेत् कस्य भविष्यति? सर्वत्रैव ईश्वरस्य निवासो भवतीति विश्वष्यते भारतीयपरम्परायाम्। अत एव तुलसीपीपलवटप्रभृतीनां

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-16, No.- III, Issues-29, YEAR- July-Sept.-2023

तरूणां पूजनविधिः शास्त्रेषु समासाद्यते। तरुच्छेदनस्य जले मलमूत्रत्यागस्य च निषेधो धर्मशास्त्रेण विधीयते। अत एव पृथिव्यां मलमूत्रत्यागात् प्राक् 'मलमूत्रं कर्तुमिच्छाम्याज्ञां देहि वसुन्धरे' इति प्रार्थनापुरस्सरं मलमूत्रविसर्जनं कर्तव्यम्। एवमेव प्रातरुत्थाय प्रथमं पृथिवीं प्रणम्य ततः पादौ स्थापनीयौ पृथिव्याम्। स्नानकाले पद्यमिदं पठनीयं सज्जनैः–

**गङ्गे च यमुने चैव गोदावरि सरस्वति।**
**नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।।**

एतेन पद्येन संस्कृतसमुपासकेन सर्वासां प्रमुखनदीनां स्मरणं क्रियते। संस्कृतगुरुकुले स्थितायाः संस्तच्छात्रायाः पर्यावरणसंरक्षणस्य परमोदात्ताः भावाः श्लोकेऽस्मिनवलोकनीयाः–

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।**
**आदौ वः कुसुमप्रवृत्तिसमये यस्याः भवत्युत्सवः**
**सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम्।।**[९]

इत्थं सूक्ष्मेक्षिकया निरीक्ष्यते चेत् पर्यावरणसंरक्षणस्य संसकृतशास्त्रेषु प्रतिपदं परमोदात्ताः भावाः सर्वलोककल्याणकारिणो भावाः निगूढाः परिलक्ष्यन्ते। अत एव यदा भारतीयपर्यावरणस्य शुद्धिः स्यात् तदाध्यात्मविद्यया एव भवितुं शक्नुयात्। अन्यथा प्रदूषणेन पशुपक्षिमानवानां जीवनयापनः दुर्वारं भविष्यति। तर्हि भारतेन कथं गौरवत्वपदवी प्राप्स्यते?

इत्येवं रूपेण संस्कृतसाहित्ये वाङ्मये च बाह्यस्याभ्यन्तरस्य च पर्यावरणस्य संरक्षणभावनां प्रकल्प्य कविभिः लोकस्य महानुपकारः विहितः। इति शुभम्।

## संदर्भ ग्रन्थ सूची


१. काव्यप्रकाश, रचनाकार– श्रीमम्मटाचार्य, सम्पादक– डॉ० नरेंद्र, व्याख्याकार– आचार्य विश्वेश्वर, उल्लास– प्रथम, श्लोकसंख्या– ०२, पृष्ठसंख्या– १०, प्रकाशक– ज्ञानमण्डल लिमिटेड, वाराणसी, प्रकाशित एवं पुनर्मुद्रण वर्ष– जुलाई २००६, मूल्य २५०।

२. रघुवंशमहाकाव्यम्, रचनाकार महाकवि कालिदास, सम्पादक जनार्दन शास्त्री, सर्ग १३, श्लोक ४६, पृष्ठ ५७८, प्रकाशक– मोतीलाल बनारसी दास, वाराणसी, प्रकाशित वर्ष २००४, भाषा संस्कृत और हिन्दी।

३. रघुवंशमहाकाव्यम्, रचनाकार महाकवि कालिदास, सम्पादक आचार्य प्रेमराज शास्त्री, सर्ग ०५, श्लोक ०६, प्रकाशक– हंसा प्रकाशन, जयपुर, भाषा संस्कृत और हिन्दी।

४. रघुवंशमहाकाव्यम्, रचनाकार महाकवि कालिदास, सम्पादक आचार्य प्रेमराज शास्त्री, सर्ग ५, श्लोक ७, प्रकाशक–हंसा प्रकाशन, जयपुर, भाषा संस्कृत और हिन्दी।

५. अभिज्ञानशाकुन्तलम्, रचनाकार महाकवि कालिदास, सम्पादक एवं संशोधक डॉ शिवराम शास्त्री, अंक ०४, श्लोक १४, पृष्ठ १३४, प्रकाशक लीलाकमल प्रकाशन, साकेत, मेरठ, प्रकाशित वर्ष अगस्त १६६१, संस्करण ०२, भाषा संस्कृत और हिन्दी।

६. अभिज्ञानशाकुन्तलम्, रचनाकार महाकवि कालिदास, सम्पादक आचार्य शिवराम शास्त्री, अंक प्रथम, श्लोक १०, पृष्ठ १०–१५, प्रकाशक–लीलाकमल प्रकाशन साकेत, मेरठ, प्रकाशित वर्ष अगस्त १६६१, संस्करण ०२, भाषा संस्कृत और हिन्दी।

७. अथर्ववेदीय भूमिसूक्त, काण्ड १२, सूक्त ०१, ऋचा १२, लेखक प्रो० ब्रज बिहारी चौबे, प्रकाशक– कात्यायन वैदिक साहित्य प्रकाशन, होशियारपुर, प्रकाशित वर्ष २०१०, भाषा संस्कृत और हिन्दी।

८. शुक्लयजुर्वेदीय रुद्राष्टाध्यायी, शान्त्यध्याय, मन्त्र १७, पृष्ठ १८४, प्रकाशक– गोविन्द भवन कार्यालय, गीता प्रेस, गोरखपुर, प्रकाशित संवत् २०६५ ग्यारहवां पुनर्मुद्रण, भाषा संस्कृत और हिन्दी।

६. अभिज्ञानशाकुन्तलम्, रचनाकार महाकवि कालिदास, सम्पादक एवं संशोधक डॉ शिवराम शास्त्री, अंक ०४, श्लोक ०८, पृष्ठ १२८, प्रकाशक– लीला कमल प्रकाशन, साकेत, मेरठ, प्रकाशित वर्ष अगस्त १६६१, संस्करण ०२, भाषा संस्कृत और हिन्दी।


*****